पत्रावली संख्या V-34564, पंजीकरण संख्या 533/2007-2008 भारतीय शोध समग्र पत्रिका (2021) **15,58-63**
आन्वीक्षिकी ISSN 0973-9777 प्रकाशनार्थ स्वीकृत 25 नवम्बर 2020

# संस्कृतसाहित्ये मानवाधिकारः

डॉ० माधवी शुक्ला*

*लेखक का घोषणा-पत्र*

भारतीय शोध पत्रिका आन्वीक्षिकी में प्रकाशनार्थ प्रेषित *संस्कृतसाहित्ये मानवाधिकारः* शीर्षक लेख/ शोध प्रपत्र की लेखिका मैं *माधवी शुक्ला* घोषणा करती हूँ कि लेखिका के रूप में इस लेख की सभी सामग्रियों की जिम्मेदारी लेती हूँ, क्योंकि मैंने स्वयं इसे लिखा है और अच्छी तरह से पढ़ा है और साथ ही अपने लेख/ शोध प्रपत्र को शोध पत्रिका आन्वीक्षिकी में प्रकाशित होने की स्वीकृति देती हूँ। यह लेख/ शोध प्रपत्र मूल रूप में या इसका कोई अंश कहीं और नहीं छपा है और न ही कहीं मैंने इस छपने के लिये भेजा है। यह मेरी मौलिक कृति है। मैं शोध प्रपत्र आन्वीक्षिकी के सम्पादक मण्डल को अपने लेख के संशोधन एवं सम्पादन की पूर्ण अनुमति देती हूँ। आन्वीक्षिकी में लेख प्रकाशित होने पर इसके कापीराइट का अधिकार सम्पादक को देती हूँ।

मानवाधिकारः कुत्रापि परिभाषितो नास्ति। अस्यार्थः तैः अधिकारैः क्रियते ये मानवजातेः विकासाय मूलभूताः सन्ति, मानवस्य गरिम्णा सम्बद्धाः तस्य पोषणाय आवश्यकाश्च सन्ति। मानवाधिकाराः मानवस्य विशेषास्तित्वकाराणात् तैः सम्बद्धाः सन्ति, अत एव ते जन्मतः एव प्राप्ताः भवन्ति। तत्सम्पन्नताये जाते, लिंगस्य, धर्मस्य, भाषायाः, वर्णानां विचाराः राष्ट्रियतायाः बाधकाः न भवन्ति। मानवाधिकारः मूलाधिकारः आधारभूतो अधिकारः अन्तर्निहितोऽधिकारः नैसर्गिकंचश्चाधिकार (or inalienable) इत्यादि नामभिः व्यपदिश्यते। मानवाधिकारस्य सर्वमान्या विश्वव्यापिनी च कापि परिभाषा नास्ति। अत एव राष्ट्राणि इमं स्वसौविध्यानुसारं परिभाषन्ते। विश्वस्य विकसिताः देशाः मानवाधिकारस्य परिभाषां केवलं मनुष्यस्य राजनीतिकान् नागरिकां च अधिकारान् यावत् निर्धारितान् कुर्वन्ति। भारतेन साकं अन्ये विकासशीलाः देशाः मानवाधिकारे केवलं राजनीतिकम् आर्थिकं सामाजिक सांस्कृतिकं च आधारं सन्निवेशयन्ति। मानवाधिकारस्य परिभाषा सांस्कृतिकमूल्यान्तर्गतं कार्या इति चीनदेशस्य इस्लामदेशानां च मतम् अस्ति अर्थात् मानवाधिकारे मनुष्याणां सांस्कृतिकोऽधिकारः अपि सन्निवेशनीयः।

अद्य विश्वमानवस्य समक्षं मानवाधिकारः एकस्मिन् समस्यारूपे विद्यमानः अस्ति। मानव स्वाधिकारप्राप्तये सवर्था प्रयत्नशीलो विविधा रूपेण संघर्षरतञ्चास्ति। मानवाधिकारप्राप्तये संघर्षस्य इतिहासः अत्यन्तं प्राचीनतम् अस्ति। १२१५ ईस्वीयस्य मैग्नाकार्टा[१], १६७९ ईस्वीयस्य निरूद्धप्रत्यक्षीकरणो अधिनियमः[२], सन् १७८९ ईस्वीयस्य बिल ऑफ राईट्स[३] १७७६ ईस्वीयस्य अमरीकादेशस्य स्वतंत्रतायाः घोषणापत्रं[४] १७८९ वर्षे मानवाधिकारसम्बन्धिफ्रॉसदेशस्य घोषणापत्रं[५] तथा च १९४८ ई० वर्षे संयुक्तराष्ट्रसंघस्य मानवाधिकारविषयकं घोषणापत्रं[६] च अस्याः परम्परायाः महनीया श्रृंखला अस्ति।

व्यक्तिरूपे समूहरूपे च मानवस्य त्रीणि मुख्यानि अन्तः सम्बन्धीनि लक्ष्याणि आसन् सन्ति च— – जीवनस्य अस्तित्वं, तस्य भरणपोषणं तत्सुरक्षा च पर्यावरणस्य सुरक्षा पारिस्थितिकं सन्तुलनं, स्वच्छो वायुः, शुद्ध पेयजलं, स्वस्थं वातावरणं प्रभृतयः मानवस्य जीवनाय आवश्यकाः सन्ति । भरणपोषणाय भोजनं, वस्त्रं, आवास, चिकित्सा, शिक्षा, आजीविका

* राजनीति विज्ञान विभाग, राजकीय पी0जी0 कॉलेज, चुनार मिर्जापुर (उत्तर प्रदेश) भारत



© लेखक २०२१, एम०पी०ए०एस०वी०ओ० मुद्रण एवं आन्वीक्षिकी सदस्य सहसंयोजन से प्रकाशित, सर्वाधिकार सुरक्षित मनीषा प्रकाशन। आज्ञा हेतु कृपया सम्पर्क करें : E-mail : maneeshashukla76@rediffmail.com & ijraeditor@yahoo.in, इस प्रपत्र को www.anvikshikijournal.com पर पढ़ें

यातायातसीविध्यं प्रभृतयः अपेक्षिताः भवन्ति। मानवस्य सुरक्षायै तस्य मौलिकानाम् अधिकाराणां समाजेन राज्यद्वारा च मान्यता सुनिश्चितीकरणं तदुपभोगाय सामाजिकी सहमतिः, वैधानिकम् आश्वासनम् चावश्यकमस्ति।

मानवाधिकाराः एवंविधाः अधिकाराः भवन्ति ये प्रतिमानवं जन्मजातरूपेण प्राप्ताः भवन्ति तज्जीवनस्य अभिन्नानि अङ्गानि च भवन्ति। इमे अधिकाराः मानवजीवनाय तद् विकासाय च आधारभूताः भवन्ति। एवं विधानाम् अधिकाराणाम् उपभोगाय सामाजिकीदशा अनिवार्या अस्ति। इमे अधिकाराः मानवस्य मूलभूतभौतिकावश्यकतानां पूर्ति विदधति। इमे अधिकाराः प्रतिराज्यं स्वसंविधाननियमेषु सम्मिलिताः करणीयाः। भारतं प्राचीनकालादेव मानवतायाः मानवाधिकाराणां च संवाहकम् अस्ति। भारते मानवाधिकारहरणं ब्रिटिशानां आगमन–समयादेव प्रारब्धं, परन्तु आँग्लानां बहिर् गमनान्तरं भारते मानवाधिकारान् प्रति गंभीरः सम्मानः व्यक्तीकृतः, यस्य महत्तमं प्रमाणं भारतस्य संविधानमस्ति। भारतस्य संविधाने सर्वान् जनान् प्रति स्वधर्म–मूलवंश जाति–लिङ्ग–वर्णप्रभृतिषु पृथक् सत्स्वपि समानाः अभिमताः सन्ति। तथा च राजनीतिक–सामाजिक–धार्मिक–सांस्कृतिकप्रभृतयः अधिकाराः प्रदत्ताः सन्ति। इमे अधिकाराः संविधानस्य तृतीयभागे मूलाधिकार इति शीर्षकान्तर्गतं स्थिताः सन्ति। यस्य उल्लंघनं कोऽपि कर्तुं न शक्नोति। एषाम् अधिकाराणां उल्लंघने जाते न्यायालयेन दण्डव्यवस्था कर्तुं शक्यते अधिकारश्च प्रतिग्रहीतुं शक्यते। संसद् अपि संविधाने संशोधनं विधाय इमान् अधिकारान् अधिहर्तुं न शक्नोति। अस्माकं संविधान १४, १५, १६(१), १९(१क), १९(२ख), २०, २१, २५ संख्याकाः अनुच्छेदाः एवंविधाः सन्ति येषु मानवाधिकाराणां सन्दर्भे एष उल्लेखो वर्तते।[७] संयुक्तराष्ट्रसंघद्वारा १९४८ तमे वर्षे सितम्बरमासस्य दशमे दिनांक सार्वभौमिकमानवाधिकाराणाम् एक घोषणापत्रं, एका प्रस्तावना, त्रिंशत् अनुच्छेदाः च सन्ति। अस्मिन् घोषणापत्रे सर्वेषां मनुष्याणां सर्वेषां राष्ट्राणां च कृते समानस्तरीया उपलब्धिः कृता अस्ति। सर्वेषां राष्ट्राणां मानवाधिकारविषये स्वतंत्रताविषये च प्रभावपूर्ण प्रय आकृति घोषणापत्रे कथितमस्ति यत् 'सर्वे मानवाः स्वतंत्राः सन्ति। तेषां गरिमा अधिकारश्च समानः अस्ति' एतन्मानवाधिकारघोषणा–पत्रानुसारेण जाति–वर्ण–लिंग–भाषा धर्म राष्ट्रीयता राजनीति सामाजिक उद्गस्थान–विचारधाराजन्मप्रभृतिभिः सम्बन्धितविचारधारां विना सर्वविधानां अधिकाराणां स्वतन्त्रतानां सन्दर्भे मानवः अधिकृतोऽस्ति। मानवाधिकाराः श्रेणीद्वये विभक्ताः सन्ति– (१) नागरिका राजनीतिका वा अधिकारा (२) आर्थिकः सामाजिकः अधिकारश्च। प्रथमप्रकारकेषु अधिकारेषु जीवनाधिकार, स्वतंत्रताधिकारः, सुरक्षा–धिकारः पारतंत्र्यात् दास्याच्च मुक्तेः अधिकारः, नियमसमक्षं साम्याधिकारः, गमनागमन–विचारों–अन्तःकरण–धर्मविषयकः स्वाधिकारः शासने भागं महाप्रवे व अधिकारः अस्ति। द्वितीयश्कारकेषु अधिकारेषु सामाजिकी सुरक्षा, समाजस्य सांस्कृतिककार्येषु भागग्रहणम् इत्यादयः अधिकाराः सम्मिलिताः सन्ति। मानवाधिकाराणां सन्दर्भे यान् प्रश्ननानधिकृत्य संयुक्तराष्ट्रसंघघोषणापत्रे ये प्रस्तावाः स्वीकृताः सन्ति, विश्वजनमतं निमार्तुम् अभीष्टाः आसन् ते एवंविधाः सन्ति–नारीणाम् अधिकारः, बालकानाम् अधिकारः आत्मनिर्णयस्य अधिकारः, विकासस्य अधिकारः, प्रत्येकविधधार्मिकी असहिष्णुतां समाप्तां कतुम् अधिकारः प्राविधिकविकासविषयकः अधिकारः, प्रवासिनां जनानां सुरक्षाधिकारः, विविधप्रकारक– अमानवीय व्यवहारेभ्यः सुरक्षा, अल्पसंख्याकानां सुरक्षा, मूलनागरिकान् प्रति भेदभावं अपसारयितुम् अधिकारश्च। एवंप्रकारेण संयुक्तराष्ट्रसंघेन समस्तमानवजातये भेदभावं विना मूलभूताः मानवीयाः अधिकारा प्रदत्ताः तेषां संरक्षणाय अन्तर्राष्ट्रि– मानवाधिकारायोगानां स्थापना कृतास्ति। या समये समये विश्वस्य विभिन्न राष्ट्रेषु मानवाधिकाराणां स्थितेः निरीक्षणं करोति।

विश्वस्तरे मानवाधिकाराणां सन्दर्भे विवर्धमानां जागरूकतां दर्श दर्श अस्माकं देशे १९९३ वर्षे अक्टूबरमासस्य द्वादशदिनांके मानवाधिकारायोगस्य संघटनं कृतम्। अयं चायोगः राष्ट्रस्तरीयः अस्ति।

मानवाधिकारस्य सन्दर्भे भारतीय मूल्ये कदाचित् प्राचीनतमं साक्ष्यं प्रस्तोतुं शक्नोति। तत्र भाषा तु संस्कृता एव अस्ति। उपलब्ध प्राचीनतमे साहित्ये ऋग्वेदे यस्य उद्घोषः अस्ति....*अज्येष्ठासो अकनिष्ठास एते संभ्रातरो वावृधुः सौभागाय* अथर्ववेदस्यानुसारेण सर्वेषां मनुष्याणां जले अन्ने च प्राकृतिकसंसाधने समानोऽधिकारः अस्ति– *समानी प्रपा सहवोन्नभागः। समाने योवत्रे सह वो युनज्मि। अराः नाभिमिवाभितः।*[८]

वेदाः उपनिषदश्च एकं पारिभाषिक शब्द 'धर्मम्' इति विकसितवन्तः। ये अधिकार कर्तव्यं च समग्रतया समाविष्टं कुर्वन्ति जीवनदर्शनस्य दृष्टिं च प्रददति। मानवमात्रे सर्वागीणविचाराणां नियमनानां च सर्वोच्च माध्यमं, संस्कृतभाषायां निबद्धं प्राचीनं साहित्यमेव भवितुं शक्नोति। अस्माकं संविधानस्य मानवाधिकाराणां मार्गदर्शन अस्मिन्नेव साहित्ये कृतम् अस्ति। सर्वोच्चन्यायालयः व्याहरति 'ये मूलाधिकाराः प्रतिनिध्यं विद्धति तेषां सामान्यानां मूल्यानां अस्य देशस्य जनैः

वैदिककालत: परिपालनं क्रियामाणम् अस्ति, व्यक्तिगतं गौरवं संरक्षितं कुर्वत् एवंविधं वातावरणं निर्मितं यथा प्रत्येकं जन: स्वव्यक्तित्वस्य सम्पूर्णतया उच्चैस्तमं विकासं कर्तुं शक्नोति।' ('मेनका गांधी बनाम भारत सरकार वाद सं० १९७८(१) २४८।

भारतवर्षस्य मानवजीवनं प्रति उच्चैस्तम: आदर्श: संक्षेपत: परन्तु सम्पूर्णतया समाहितं कुर्वाण:, *सर्वे भवन्तु सुखिन:* इति उक्ते: निर्गत: भाव: *वसुधैव कुटुम्बकम्* इति अस्ति। एभि: आशयै: प्रेरिता: सारभूता: भावा: संस्कृतसाहित्यस्यालोके संक्षेपतो प्रस्तुता: सन्ति–

*सुखप्राप्ते: अधिकार:* –जीवनस्य प्रत्येकं स्तरे प्रत्येकं पक्षे सुखप्राप्ति: मानवमात्रस्य नैसर्गिकी इच्छा अस्ति। अयं नैसर्गिको मानवाधिकार: अस्ति। सुखं विना जीवनम् अर्थहीनम् अस्ति। अत्र सर्वविधा: अधिकारा: निहिता: सन्ति, ये सुखप्राप्ती सहायका: सन्ति। प्रतिमानवं सामर्थ्यमस्ति आत्मप्रयासै: सुखप्राप्ते। स्वकीयम् इच्छा पूरयितुं स्वस्मै कुटुम्बिजनेभ्य: च आयासं कुर्वन्ति किन्तु जीवनं सुखदु:खयो: मिश्रणम् अस्ति इति कठोरं सत्यम् अस्ति। संस्कृतशास्त्रकारै: सुखस्य दु:खनिवारणस्य च प्रतिपदं घोष: कृत: 'सर्वे भवन्तु सुखिन: सर्वे सन्तु निरामया:। सर्वे भद्राणि पश्यन्तु मा कश्चिद्दु:खभाग् भवेत्। इति।

मानवमात्रस्य सुखस्य संरक्षणं राज्ञ: शासकस्य च धर्म: अस्ति। कौटिल्यस्य श्लोकोऽयं द्रष्टव्य: –*प्रजासुखे सुखं राज्ञ:, प्रजानां च हिते हितम्। नात्मप्रियं हितं राज्ञ: प्रजानां तु प्रियं हितम्।।*[९] सुखस्य अधिकार: सर्वेषाम् अधिकाराणां मूलमस्ति अत: अस्मिन्नेव मुख्यरूपेण दृष्टिं विधाय समग्रमानवहिताय मानवाधिकाराणां प्रयास: कर्त्तव्य: *सर्वे पदा हस्ति पदेनिमग्ना:।*

*समानताया: अधिकार:* –समानताया: अधिकार: अतीव महत्वपूर्णो मानवाधिकार: अस्ति, यं विना सुखम् असम्भवमस्ति। पक्षपात: अन्यायो वा दु:खस्य सर्वाधिकं महत्वपूर्ण कारणमस्ति। प्राचीनतमं साहित्यं ऋग्वेद: इमं महत्वपूर्ण तथ्यम् एवं निर्दिशति – *अज्येष्ठासो अकनिष्ठास एते, सं भ्रातरो वावृधु सौभगाय। सङ्गच्छध्वं संवदध्वं सं वो मनांसि जानताम् समानो मंत्र: समिति: समानी समानं मन: सह चित्तमेषाम्। समानी व आकूति: समानानि हृदयानि व: समानमस्तु वो मनो यथा व: सुसहासति।।*[१०] अर्थात् कोऽपि ज्येष्ठो नास्ति कोऽपि कनिष्ठो नास्ति। सर्वे भ्रातर: सन्ति। सर्वे सर्वेषां ध्यानं कुर्वन्त: सामूहिको प्रगतिं कुर्वन्तु। सह गच्छध्वं परस्परं वार्तालापं कुरूध्वं स्वकीयं मन: समानं कुद्धध्वं स्वसहयोगिन: समानान् कुरूध्वं, मन:एकरूपं भवेत् यथा सर्वे प्राणिन: प्रसन्नतया जीवन्तु। अत्रेदम् उल्लेखनीयमस्ति, यत् मानवाधिकारस्य सार्वभौमिके घोषणापत्रे प्रथमे सप्तमे च अनुच्छेद ऋग्वेदे इदमेव तथ्यं व्यवहृत्तम् अस्ति। मनुस्मृतिकारेण एष एव राजधर्मेण सह सनिविष्टो अस्ति.....*यथा सर्वाणि भूतानि धरा धारयते समम्। तथा सर्वाणि भूतानि विभ्रत: पार्थिवं व्रतम्।।*[११] तात्पर्यमिदमस्ति यत् माता सर्वान् सुतान् समानरूपेण पालयति तथैव राजापि तत्तथैव कुर्यात्। भारतीयसंविधाने साम्यभावस्य अधिकाराय मूला–धिकाररूपेण महत्वं प्रदत्तमस्ति।

शिक्षाधिकार: –महाभारतानुसारं मानवस्य ज्ञानार्जनं, अर्जितज्ञानस्य अग्रेऽपि विवर्धनम् ऋणचतुष्टये अन्यतमम् अस्ति। सर्वोच्चन्यायालयेन मोहिनीजनवादे (Case) प्रकाशितं कृतमस्ति (AIR 1992 SC 1858-1866)। शिक्षाधिकार: नूनं मूला–धिकार: अस्ति। अष्टादशखण्डे द्रष्टव्यमस्ति। पुन: उन्नीकृष्णनवादे ( AIR 1993 SC 2178), सर्वोच्चन्यायालयेन शिक्षाया: महत्वं भर्तृहरिनीतिशतकात् प्रेरणा गृहीत्वा बलं प्रदत्तं शिक्षाया: अधिकारं प्रति संविधानस्य एकविंशानच्छेदान्तर्गतं मूला–धिकारस्य एको भाग: निर्दिष्टोऽस्ति। न्यायालयस्य निर्णये उल्लिखितो भर्तृहरिलिखितनीतिशतकस्य श्लोक अधोलिखितो विद्यते –*विद्या नाम नरस्य रूपमधिकं प्रच्छन्नगुप्तं धनं, विद्या भोगकरी यश: सुखकरी विद्या गुरूणां गुरू:। विद्या बन्धुजनो विदेशगमने विद्या परं दैवतं, विद्या राजसु पूज्यते नहि धनं विद्याविहीन: पशु:।।*[१२]

*धर्मपालनस्याधिकार:* –संयुक्तराष्ट्रसंघस्य घोषणानुसारेण अनेकैरनुको आर्थिक राजनैतिक मानवाधिकारा: द्वितीयेऽधिवेशने १९४८ ई० वर्षे घोषिता:। तत्र अष्टादशे अनुच्छेदे धार्मिकोऽधिकार: तदन्तर्गतं स्वमतविचारमतादिपालनं च स्वीकृतस्तान्तिपूर्णे–नानुवादेन प्राय: जना: धर्तशब्दं रेलिजन इति मजहब इति शब्दयेन व्यवहरन्ति वस्तुत: धर्मशब्दस्य प्रवृत्तिनिमित्तमत्र सन्दर्भे विमर्शनीयमस्ति। जगत: स्थितिकारणं प्राणिनां साक्षात् अभ्युदयनि: श्रेयस हेतु य: स धर्म: इति शंकराचार्यपादा: मानवजीवनस्य सार्थक्याय पुरूषार्थ–चतुष्टयं संस्कृतनीतिशास्त्रेषु वर्णितमस्ति –धर्म, अर्थ, काम, मोक्षश्च सृष्टौ मनुष्यसृष्टेरनुत्तमत्वात्

बुद्धिमहत्त्वात् संकल्पशक्तिमत्त्वाच्त्व मानवः स्वजीवने स्वकर्ममहिम्ना बहुविधा उपलब्धीरर्जयति। एतद्द्वारैव स्वजीवनस्यासौ सार्थक्यं नैरर्थक्यच निश्चिनोति। अत एव मनुष्यजीवनं सप्रयोजनं सोद्देश्यं च मत्वा तत् सार्थकं कर्तुं सर्वाः उपलब्धी– चतुर्षु वर्गेषु विभज्य संस्कृतशास्त्रकारैः मनीषिभिः पुरूषार्थ–चतुष्टयस्य धर्मार्थकाममोक्षरूपस्य संकल्पना कृता। अत्र जीवने कृतानां कर्मणां योजनाबद्धता वर्तते। येन मानवेन एते सर्वेऽपि साधिताः तस्य जीवनं सर्वथा सार्थकम्। येन एकोऽपि न साधितः तस्य जीवनं तु अतितरां निरर्थकम्। यथोक्तम् नीतिशास्त्रे –*धर्मार्थकाममोक्षाणां यस्यैकोऽपि न विद्यते। अजागलस्तस्यैव तस्य जन्मनिरर्थकम्।।*[१३] महर्षिणा वेदव्यासेन अर्थनीति राजनीति धर्मनीतिप्रभृतीनां तत्वज्ञानं विश्वकोषरूपेण महाभारतं ग्रंथरत्नं विविधैराख्यानैः प्रतिपादितमस्ति। वेदव्यासेन स्पष्टमुक्तम् –*न जातु कामान्न भयान्न लोभात्, धर्मं त्यजेज्जीवितस्यापि हेतोः। धर्मो नित्यः सुखदुःखे त्वनित्ये, जीवो नित्यो हेतुरस्य त्वनित्यः।।*[१४] महाभारतदव्यासो ब्रवीति –*ऊर्ध्वबाहुविरौम्येष न च कश्चित् श्रृणोति मे। धर्मादर्थश्च कामश्च स किमर्थं न सेव्यते।।*[१५] महाभारतस्य आदिपर्वणि (२/३८३) उक्तिमस्ति –*अर्थशास्त्रमिदं प्रोक्तम् धर्मशास्त्रमिदं महत्। कामशास्त्रमिदं प्रोक्तम् व्यासेनामितबुद्धिना।।*[१६]

महाभारते धर्मस्य अतीव विशदा परिकल्पना विहितास्ति। अस्मिन् विशाले जगति नानाविधानवयवान् एकस्मिन सूत्रे एकस्यां श्रृंखलायां वा आबन्धुं यत् सार्वभौमं तत्वमस्ति तद्धर्म एवास्ति। यदि धर्मस्य तत्त्वरूपं सूत्र नाभविष्यत् तर्हि जगत् कृत्स्नं विश्रृंखलितम् अभविष्यत्। छिन्नं भिन्नं चाजनिष्यत। यथोक्तम् शान्तिपर्वणि (१७४/२१) –*सर्वत्रविहितो धर्मः सत्यप्रेत्य तपः फलम्। बहुद्वारस्य धर्मस्य नेहास्ति विफला क्रिया।।*[१७]

धर्मस्य कापि क्रिया विफला न भवति न वा किमपि धर्मानुष्ठानं वैयर्थ्यं याति वनपर्वणि (९४४) धर्मस्य महत्त्वं प्रतिपादयन् ऋषिलोमशो वदति –*वर्धत्यधर्मेण नरस्ततो भद्राणि पश्यति। ततः सप्नान् जयति समूलस्तु विनश्यति।।*[१८] अधर्माचरणेन कदाचित् मनुष्यस्य वृद्धिर्दृश्यते, किन्तु सा स्थायिनी न भवतिं क्षणिका भवति। अतः मेधावी मानवः कदापि धर्मविहीनं कर्म न कुर्यात्। यथोक्तं शान्तिपर्वणि (२९३/८) –*धर्मापदेतं यत् कर्म यद्यपि स्यान् महाफलम्। न तत् सेवेत मेधावी न तद्धितमिहोच्यते।।*[१९] कस्याञ्चिद् राजसभायां दुःखप्रपीडितो जनो यदि न्यायं याचितुं प्रवर्तते, सः प्रज्वलन् हव्यवाडव भवति, तं प्रति सभासदां कर्तव्यं भवति, यत् ते सत्येन धर्मेण प्रशमन्तु, यथोक्तम् सभापर्वणि अष्टषष्टितमेऽध्याये –*सभां प्रपद्यते ह्यार्तः प्रज्वलन्निव हव्यवाट्। तं वै सत्येन धर्मेण सभ्याः प्रशमन्त्युत।।*[२०]*; विन्दो धर्मो ह्यथर्मेण सभां यथोपपद्यते। न चास्य शल्यं कृन्तन्ति विद्वास्तत्र सभासदः।।*[२१]

उद्योगपर्वणो पञ्चनवतितमे अध्याये महाभारते उक्तमस्ति –*यत्र ह्यधर्मेण सत्यं यथानृतेन च। हन्यते प्रेक्षमाणानां हतास्तत्र सभासदः।।*[२२] राजधर्मविषये महाभारतस्य विराटपर्वणि कीचकप्रसंगे कथा आगतास्ति यदा द्रुपदसुतां प्रति कृतानि कीचकदुष्कृत्यानि राजा विराट् तत्र ध्यानं प्रदाय तमन्यायात् अवरोद्धुं न प्रयतते। अपमानिता सैरन्ध्री राजान यथोचितं कथयति –*न राजा राजवत् किञ्चित् समाचरति कीचके। दस्यूनामिव धर्मस्ते नहि संसदि शोभते।।*[२३] अन्यायिनः दण्डनम् राजधर्मः अस्ति। त्वं राजा सत्रपि राजवत् न किञ्चत् आचरसि। अयन्तु स्यू ना धर्मः सभायां राज्ञो व्यवहार एष न शोभते। अतः राजधर्मः राजभिः पालनीयः।

मानवने ऋषि–पितृ–देवानां वेदाध्यापन–पुत्रोत्पादन यज्ञयजनरूपाणां त्रयाणां ऋणानां निष्क्रयसम्पादन विना संन्यासग्रहणं धर्मप्रतिकूलमस्ति। अतः आदर्शमानवजीवनाय वर्णाश्रमधर्मस्य विधिवत् पालनम् महाभारतानुसारं कर्तव्यमस्ति। विशिष्टधर्माति –रिक्ताः सामान्याः वर्णाश्रमधर्माः अधस्तात् महाभारतीये पद्मे निर्दिष्टाः सन्ति –*श्रूयतां धर्मसर्वस्वं श्रुत्वा चाप्यवधार्यताम्। आत्मनः प्रतिकूलानि परेशान न समाचरेत्।।*[२४] धर्मपालनाधिकारस्य संरक्षणं राजधर्मान्तर्गतमस्ति। राज्ञः कर्तव्यमस्ति यत् स प्रत्येकं धर्मस्य पार्थक्यभावनां विना संरक्षणं कुर्यात्।

धर्मकोशानुसारं –*पाषण्डनैगमश्रेणी पूगप्रातगणादिषु। संरक्षेत्समयं राजा दुर्गे जनपदे तथा।।*[२५] अर्थात् यस्य वेदे आस्था भवति यस्य वेदे आस्था न भवति तथा अन्यान् सर्वान् राजा संरक्षेत्। भारतीय संविधानस्य पञ्चविंशे अनुच्छेदे, मानवा– धिकारस्य सार्वभौमिके घोषणापत्रे अष्टादशे अनुच्छेदे धर्मपालनस्य –स्वतंत्रताया धर्मनिरपेक्षतायाश्च विवरणम् उपभयमपि स्वीकृतमस्ति। स्त्रीणां सामाजिक आर्थिक श्चाधिकारः –स्त्रीणां सामाजिकान् अधिकारान् संरक्षितुम् एक एव उपायः अस्ति *यत्र नार्यस्तु पूज्यन्ते* –स्त्री माता अस्ति माता च ईश्वरः! हितोपदेशानुसारम् –*मातृवत् परदारेषु परद्रव्येषु लोष्ठवत्। आत्मवत् सर्वभूतेषु यः पश्यति स पण्डितः।।*[२६] अर्थात् परस्त्री मातृतुल्या भवति। वाक्यमिदं नारीसंरक्षणाय सामान्यो नियमः अस्ति।

तदितरनारीसंरक्षणं परिवारस्य पुरूषसदस्यैः विविधेषु वयसि सम्बन्धविषयेऽपि लिखितमस्ति –*पिता रक्षति कौमारे भर्ता रक्षति यौवने। रक्षन्ति स्थविरे पुत्राः न स्त्री स्वातंत्र्यमर्हति।।*[७] प्राचीनभारतीयसाहित्ये न केवलं नार्याः संरक्षणम् उल्लिखितमस्ति अपितु तासां स्वकीयधनस्य चरित्रस्य च रक्षा सन्दर्भे दण्डस्य नियमाः अपि विहिताः सन्ति। धनसंरक्षणविषये यथा –*न भोगं कल्पयेत् स्त्रीषु, देवराजधनेषु च।*[८] चरित्ररक्षार्थं दण्डनियमो यथा –*संरूद्धस्य वा तत्रैव घातः तदेवाध्यक्षेण गृहीतापयामार्यायां विद्यात्।*[९] अपहृत्कन्यायाः संरक्षणं यथा –*बलाच्चेदपहता कन्या मन्त्रैर्यदि न संस्कृता। अन्यस्मै विधिवत् देया यथा कन्या तथैव सा।।*[१०] अर्थात् बलपूर्वकं हृतया कन्यया सह विवाहः न कर्तुं शक्यते। यदि विधिपूर्वकं दातुं शक्यते। (एयर इण्डिया बनाम नरगेश मीरजा AIR 1981S.C.1829) अस्मिन् वादे अपहृतयाः कन्याया विषये न्ययविधिनिहितः निर्णयः न्यायालयेन दत्त आसीत् यत् इयम् सामान्यकन्यातुल्या मन्तव्या अर्थात् कस्मैचित् विधिपूर्वकं दातुं शक्यते।

*न्यायाधिकारः* –न्यायाप्राप्तेरधिकारः मानवमात्रस्यास्ति। अत्रिसंहितानुसारं राज्ञः पञ्च कर्त्तव्यानि सन्ति –*दुष्टस्य दण्डः सुजनस्य पूजा न्यायेन कोषस्य च सम्प्रवृद्धिः। अपक्षातोऽर्थिषु राष्ट्ररक्षा पश्चैव यज्ञाः कथिता नृपाणाम्।।*[११] न्यायाधीशेन पक्षपातरहितेन भाव्यं तथा च न्याये विलम्बो न विधेयः। शुक्रनीतेः अनुसार –*पक्षपाताधिरोपस्य कारणानि च पञ्च वै। रागलोभ–भयद्वेषाः वादिनोश्च रहः श्रुतिः।। न कालहरणं कार्य राज्ञा साक्षिप्रभाषणे। महान् दोषो भवेत् कालाद् धर्मव्यावृत्तिलक्षणम्।।*[१२]

संक्षेपतः इमे सर्वे पक्षाः मानवाधिकारस्य परिधौ आयान्ति तथा संस्कृतसाहित्यस्य ज्ञाननिधेः प्राचीनां महत्तां प्रतिपादितां कुर्वन्तः वर्तमानविचारणायां निर्णयात्मकभूमिकया सह सहयोगं प्रददति। मनुष्यः एको विचारशीलः प्राणी अस्ति सदाऽसौ स्वाधिकारान् प्रति जागरूकस्तिष्ठति अतः मानवाधिकाराणां चर्चा भूते वर्तमाने भविष्यति च कालत्रितयेऽपि स्थानप्रतिष्ठां प्राप्स्यति। सर्वे मानवाः अधिकारयुक्ताः भवन्तु पूर्णजागरूकतया कर्तव्यच कुर्वन्तु देव राष्ट्र सम्पूर्णविश्वास्य उत्कर्मचरमस्य संस्पर्श करिष्यति।

सन्दर्भाः

[1]THOMPSON, FAITH, MAGNA CARTA ; Its Role in the making of English Constitution 1300-1629; University of Minnesota Press (1948), pp- 216-230.

[2]*Parliament of England, Habeas Corpus Act- 1679-* An Act for the better securing the liberty of the Subject, and for prevention of Imprisonment beyond the Seas-

[3]*To Set limits on what the government can and cannot do regarding personal liberties National Archives*, James Madison

[4]*Thomas Jefferson,* National Archives.

[5]FLANK MALOY ANDERSON, ed; The Constitutions and other selected documents illustrative of the history of France; year 1904.

[6]*All human beings are born free and equal in dignity and rights.* They are endowed with reason and should act towards one another in a spirit of brotherhood. Article 1 of the United Nations Universal Declaration of Human Rights

[७]भारत का संविधान एक परिचय –दुर्गादास बसु, पृष्ठ संख्या ८५

[८]अथर्ववेद, २/५/९

[९]अर्थशास्त्र –डॉ० आर० शर्मा शास्त्री, अध्याय –१९, श्लोक –३६, अष्टम संस्करणं, पृष्ठ संख्या ३१

[१०]ऋग्वेद, दशम मण्डलं –१९१, सूक्तं –१, मंत्रः

[११]मनुस्मृति, राजधर्म (१०–३१)

[१२]भर्तृहरि, नीतिशतकम्

[१३]कामन्दकीय नीतिसारः, २/२६

[१४]वेदव्यासः, २/१०२

[१५]महाभारते –वेदव्यासः, २/२६

[१६]आदिपर्वणि महाभारते –वेदव्यासः, २/३८३–५

[17]शान्तिपर्वणि, १७४/२१
[18]वनपर्वणि, २४/४
[19]शान्तिपर्वणि, २९३/८
[20]सभापर्वणि, ६८/६०
[21]सभापर्वणि, द्यूतपर्व, ६८/७७
[22]उद्योगपर्वणि, ९५/२६
[23]विराटपर्वणि, ९६/३१
[24]शान्तिपर्वणि, ११/२३
[25]भर्तृहरि –नीतिशतकम्, श्लोक –२५
[26]धर्मकोश, पृष्ठ संख्या ८७०
[27]मनुस्मृति, १०–३
[28]कात्यायन, ३/३०
[29]अर्थशास्त्र, पृष्ठ संख्या २५६
[30]वशिष्ठ, पृष्ठ संख्या ७२–७३; धर्मकोश, पृष्ठ संख्या १०२
[31]अत्रिसंहिता, ५/१९
[32]शुक्रनीति, ४–५/१४/१५